Roll No. ........................... Total Printed Pages - 5

# F - 3542

## M. A. (Final) Examination, 2022
## SANSKRIT
### Paper - Sixth
### (काव्यम्)

*Time : Three Hours]* *[Maximum Marks:100*

**नोटः सर्वे प्रश्नाः समाधेयाः। सर्वे समानाङ्काः।**

### इकाई - I

1. कयोश्चिद् **द्वयोः** पद्ययोः व्याख्या कार्या - **20**

(i) कश्चिद्कान्ताविरहगुरुणा स्वाधिकारप्रमत्तः
शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।
यक्षश्चक्रे जनकतनयास्नान पुण्योदकेषु
स्निग्धश्छायातरुषु वसतिं रामगिर्याश्रमेषु।।





(ii) धूमज्योतिः सलिलमरुतां संनिपातः क्वमेघः,
संदेशार्थः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन्मुह्यकालं ययाचे,
कामार्त्तो हि प्रणयकृपणाश्चेतनाचेतनेषु।।

(iii) वक्रः पन्था यदपि भवतः प्रस्थितस्योन्तराशां,
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः।
विद्युद्दामस्फुरितचकितैस्तत्र पौरङ्गनानां,
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि।।

### इकाई - II

2. कयोश्चिद् **द्वयोः** पद्ययोः सप्रसङ्गं व्याख्या विधेया - **20**

(i) नेत्रा नीता सततगतिना यद्विमानायभूमी-
रालेख्यानां नवजलकणैर्दोषमुत्पाद्य सद्यः,
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यच्चजाले-
र्धूमोङ्गारानुकृतिनिपुणं जर्जरा निष्पतन्ति।

(ii) मत्वा देवं धनपतिसरणं यच्च साक्षाद्वसन्तं,
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम् ।

सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै

स्तस्यारम्भश्चतुरवनिता विभ्रमैरेव सिद्धः।।

(iii) तां जानीयाः परिमितकथां जीवितं मे द्वितीयं,

दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।

गोखेरकण्ठागुरुषु दिवसेष्वेषु गच्छत्सु बालां

जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम्।।

## इकाई - III

3. केचिद् **द्वे** पद्ये सप्रसङ्गं व्याख्यायेताम् - **20**

(i) श्रियः पतिः श्रीमति शासितुं जगत्,

जगन्निवासो वसुदेवसद्मनि।

वसन्ददर्शावतरन्तमम्बराद्,

हिरण्यगर्भाङ्गभुवं मुनिं हरिः।।

(ii) निसर्गचित्रोज्जवलसूक्ष्मपक्ष्मणा,

लसद्बिसच्छेदसिताङ्गसङ्गिनो।

चकासतं चारूचमृरुचर्मणा,

कुभेन नागेन्द्रमिवेन्द्र वाहनम्।।







(iii) हरत्यधं संप्रति हेतुरेष्यतः

शुभस्य पूर्वाचरितैः कृतं शुभैः।

शरीरभाजां भवदीयदर्शनं

व्यनक्ति कालत्रितयेऽपि योग्यताम्।।

## इकाई - IV

4. कयोश्चिद् **द्वयोः** श्लोकयोः सप्रसङ्ग. व्याख्या कार्या - **20**

(i) पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानो-

रन्तः प्राणावरोधव्युपरतसकलज्ञानरूद्धेन्द्रियस्य।

आत्मन्यात्मानमेव व्यपगतकरणं पश्यतस्तत्वदृष्ट्या,

शम्भोर्वः पातु शून्येक्षणघटितलयब्रह्मलग्नः समाधिः।।

(ii) अन्धस्यदृष्टिरिव पुष्टिरिवातुरस्य,

मूर्खस्य बुद्धिरिव सिद्धिरिवालसस्य।

स्वल्पस्मृतेर्व्यसनिनः परमेव विद्या,

त्वां प्राप्य सा रतिरिवारिजने प्रनष्टा।।

(iii) पश्यन्ति मां दश दिशो वनदेवताश्च,

चन्द्रश्च दीप्तिकिरणश्च दिवाकरोरुऽयम्।

धर्मानिलौ च गगनश्च तथान्तरात्मा,

भूमिस्तथा सुकृति - दुष्कृति - साक्षिभूताः।।

## इकाई - V

5. (अ) 'उपमा कालिदासस्य' इति प्रतिपाद्यताम्। **10**

**अथवा**

मेघदूतानुसारं मानवीयमूल्यान् विवेचयत्।

(ब) शिशुपालवधस्य प्रथमसर्गस्य कथासारो लेख्याः। **10**

**अथवा**

मृच्छकटिकमाश्रित्य वसन्तसेनायाः चरित्रं निरूपयत्।